# ॥ वाल्मीकि रामायण॥

## ४ किष्किन्धाकाण्ड

### अध्याय ६६

संस्तूयमानो हनुमान्व्यवर्धत महाबलः ।
समाविध्य च लाङ्गूलं हर्षाच्च बलमेयिवान् ॥ १॥

तस्य संस्तूयमानस्य सर्वैर्वानरपुङ्गवैः ।
तेजसापूर्यमाणस्य रूपमासीदनुत्तमम् ॥ २॥

यथा विजृम्भते सिंहो विवृद्धो गिरिगह्वरे ।
मारुतस्यौरसः पुत्रस्तथा सम्प्रति जृम्भते ॥ ३॥

अशोभत मुखं तस्य जृम्भमाणस्य धीमतः ।
अम्बरीषोपमं दीप्तं विधूम इव पावकः ॥ ४॥

हरीणामुत्थितो मध्यात्सम्प्रहृष्टतनूरुहः ।
अभिवाद्य हरीन्वृद्धान्हनुमानिदमब्रवीत् ॥ ५॥

अरुजन्पर्वताग्राणि हुताशनसखोऽनिलः ।
बलवानप्रमेयश्च वायुराकाशगोचरः ॥ ६॥

तस्याहं शीघ्रवेगस्य शीघ्रगस्य महात्मनः ।
मारुतस्यौरसः पुत्रः प्लवने नास्ति मे समः ॥ ७॥

उत्सहेयं हि विस्तीर्णमालिखन्तमिवाम्बरम् ।
मेरुं गिरिमसङ्गेन परिगन्तुं सहस्रशः ॥ ८॥

बाहुवेगप्रणुन्नेन सागरेणाहमुत्सहे ।
समाप्लावयितुं लोकं सपर्वतनदीह्रदम् ॥ ९॥

ममोरुजङ्घावेगेन भविष्यति समुत्थितः ।
संमूर्छितमहाग्राहः समुद्रो वरुणालयः ॥ १०॥

पन्नगाशनमाकाशे पतन्तं पक्षिसेवितम् ।
वैनतेयमहं शक्तः परिगन्तुं सहस्रशः ॥ ११॥

उदयात्प्रस्थितं वापि ज्वलन्तं रश्मिमालिनम् ।
अनस्तमितमादित्यमभिगन्तुं समुत्सहे ॥ १२॥

ततो भूमिमसंस्पृश्य पुनरागन्तुमुत्सहे ।
प्रवेगेनैव महता भीमेन प्लवगर्षभाः ॥ १३॥

उत्सहेयमतिक्रान्तुं सर्वानाकाशगोचरान् ।
सागरं क्षोभयिष्यामि दारयिष्यामि मेदिनीम् ॥ १४॥

पर्वतान्कम्पयिष्यामि प्लवमानः प्लवङ्गमाः ।
हरिष्ये चोरुवेगेन प्लवमानो महार्णवम् ॥ १५॥

लतानां वीरुधां पुष्पं पादपानां च सर्वशः ।
अनुयास्यति मामद्य प्लवमानं विहायसा ।
भविष्यति हि मे पन्थाः स्वातेः पन्था इवाम्बरे ॥ १६॥

चरन्तं घोरमाकाशमुत्पतिष्यन्तमेव च ।
द्रक्ष्यन्ति निपतन्तं च सर्वभूतानि वानराः ॥ १७॥

महामेरुप्रतीकाशं मां द्रक्ष्यध्वं प्लवङ्गमाः ।
दिवमावृत्य गच्छन्तं ग्रसमानमिवाम्बरम् ॥ १८॥

विधमिष्यामि जीमूतान्कम्पयिष्यामि पर्वतान् ।
सागरं क्षोभयिष्यामि प्लवमानः समाहितः ॥ १९॥

वैनतेयस्य वा शक्तिर्मम वा मारुतस्य वा ।
ऋते सुपर्णराजानं मारुतं वा महाबलम् ।
न हि भूतं प्रपश्यामि यो मां प्लुतमनुव्रजेत् ॥ २०॥

निमेषान्तरमात्रेण निरालम्भनमम्बरम् ।
सहसा निपतिष्यामि घनाद्विद्युदिवोत्थिता ॥ २१॥

भविष्यति हि मे रूपं प्लवमानस्य सागरम् ।
विष्णोः प्रक्रममाणस्य तदा त्रीन्विक्रमानिव ॥ २२॥

बुद्ध्या चाहं प्रपश्यामि मनश्चेष्टा च मे तथा ।
अहं द्रक्ष्यामि वैदेहीं प्रमोदध्वं प्लवङ्गमाः ॥ २३॥

मारुतस्य समो वेगे गरुडस्य समो जवे ।
अयुतं योजनानां तु गमिष्यामीति मे मतिः ॥ २४॥

वासवस्य सवज्रस्य ब्रह्मणो वा स्वयम्भुवः ।
विक्रम्य सहसा हस्तादमृतं तदिहानये ।

लङ्कां वापि समुत्क्षिप्य गच्छेयमिति मे मतिः ॥ २५ ॥

तमेवं वानरश्रेष्ठं गर्जन्तममितौजसं ।
उवाच परिसंहृष्टो जाम्बवान्हरिसत्तमः ॥ २६ ॥

वीर केसरिणः पुत्र वेगवन्मारुतात्मज ।
ज्ञातीनां विपुलं शोकस्त्वया तात प्रणाशितः ॥ २७ ॥

तव कल्याणरुचयः कपिमुख्याः समागताः ।
मङ्गलं कार्यसिद्ध्यर्थं करिष्यन्ति समाहिताः ॥ २८ ॥

ऋषीणां च प्रसादेन कपिवृद्धमतेन च ।
गुरूणां च प्रसादेन प्लवस्व त्वं महार्णवम् ॥ २९ ॥

स्थास्यामश्चैकपादेन यावदागमनं तव ।
त्वद्गतानि च सर्वेषां जीवितानि वनौकसाम् ॥ ३० ॥

ततस्तु हरिशार्दूलस्तानुवाच वनौकसः ।
नेयं मम मही वेगं प्लवने धारयिष्यति ॥ ३१ ॥

एतानि हि नगस्यास्य शिलासङ्कटशालिनः ।
शिखराणि महेन्द्रस्य स्थिराणि च महान्ति च ॥ ३२ ॥

एतानि मम निष्पेषं पादयोः पततां वराः ।
प्लवतो धारयिष्यन्ति योजनानामितः शतम् ॥ ३३ ॥

ततस्तु मारुतप्रख्यः स हरिर्मारुतात्मजः ।
आरुरोह नगश्रेष्ठं महेन्द्रमरिमर्दनः ॥ ३४ ॥

वृतं नानाविधैर्वृक्षैर्मृगसेवितशाद्वलम् ।
लताकुसुमसम्बाधं नित्यपुष्पफलद्रुमम् ॥ ३५ ॥

सिंहशार्दूलचरितं मत्तमातङ्गसेवितम् ।
मत्तद्विजगणोद्घुष्टं सलिलोत्पीडसङ्कुलम् ॥ ३६ ॥

महद्भिरुच्छ्रितं शृङ्गैर्महेन्द्रं स महाबलः ।
विचचार हरिश्रेष्ठो महेन्द्रसमविक्रमः ॥ ३७ ॥

पादाभ्यां पीडितस्तेन महाशैलो महात्मना ।
ररास सिंहाभिहतो महान्मत्त इव द्विपः ॥ ३८ ॥

मुमोच सलिलोत्पीडान्विप्रकीर्णशिलोच्चयः ।
वित्रस्तमृगमातङ्गः प्रकम्पितमहाद्रुमः ॥ ३९ ॥

नानागन्धर्वमिथुनैः पानसंसर्गकर्कशैः ।
उत्पतद्भिर्विहङ्गैश्च विद्याधरगणैरपि ॥ ४० ॥

त्यज्यमानमहासानुः संनिलीनमहोरगः ।
शैलशृङ्गशिलोद्घातस्तदाभूत्स महागिरिः ॥ ४१ ॥

निःश्वसद्भिस्तदा तैस्तु भुजगैरर्धनिःसृतैः ।
सपताक इवाभाति स तदा धरणीधरः ॥ ४२ ॥

ऋषिभिस्त्रास सम्भ्रान्तैस्त्यज्यमानः शिलोच्चयः ।
सीदन्महति कान्तारे सार्थहीन इवाध्वगः ॥ ४३ ॥

स वेगवान्वेगसमाहितात्मा
हरिप्रवीरः परवीरहन्ता ।
मनः समाधाय महानुभावो
जगाम लङ्कां मनसा मनस्वी ॥ ४४ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com